## Semester -1 Syllabus

UNIT-1

1.हिमालयोनामनगाधिराजः -(Word to Word meaning and Translation & Essay) कालिदासविरचितकुमारसम्भवमहाकाव्यप्रथमसर्ग१-१०श्लोकानिप्रतिपदार्थतात्पर्यंचलिखत, व्यासरूपप्रश्नः

2.मुदाभिषेक्तुंवरदत्वमर्हसि -वाल्मीकिरामायणम्(References and Essay) (ससन्दर्भव्याक्ख्यानानि, व्यासरूपप्रश्नः)

UNIT-II

3.धर्मबद्धदौवारिकः - अम्बिकादत्तव्यासविरचितशिवराजविजय (व्यासरूपप्रश्नः) (Essay )

4. कृतज्ञेनास्तिनिष्कृतिः -विष्णुशर्मणाविरचितपञ्चतन्त्रम् व्यासरुपप्रश्नःससन्दर्भानिव्याक्यात(Essay & References)

UNIT-III

B. सन्धयः - सवर्णदीर्घ,गुण,वृद्धि,यणादेश,अयवायाव, श्चुत्वा, ष्टुत्वा,लत्त्वा,झश्वा,अनुनासिक,विसर्ग,

C. शब्दाः - अजन्तपुंलिङ्गशब्दाः

UNIT-IV

A. बालादर्शः - - ६ - ९पाठम् (6th to 9th lesson)

B एषधर्मः सनातनः - -सुभाषितानि ( for seminar)

K. Varalakshmi

Professor Department of ... Studies ... Hyderabad ... University ... ARTS

## बालादर्शः षष्ठः पाठः !

### षष्ठः पाठः। 6th Lesson

आवां शकटेन गृहं गच्छावः। युवां नौकया नदीं तरथः। नाविकः क्षेपण्या नौकां क्षिपति। शाकटिकः कशया वृषभौ ताडयति। शकटं चक्राभ्यां गच्छति। लता पुष्पैः लसति। बालकः हस्तेन चन्द्रम् आह्वयति। जनाः पादाभ्यां गच्छन्ति। नारी पत्या विलसति ।

प्रश्नाः -

१. युवां केन गृहं गच्छथः ?

२. आवां कया नदीं तरावः ?

३. लता कैः लसति?

४. शकटं काभ्यां गच्छति?

५. जनाः काभ्यां गच्छन्ति?

**सप्तमः पाठः। 7th Lesson**

धेनवः वत्सेभ्यः क्षीरं वितरन्ति । व्याघ्रः आहाराय भ्राम्यति। बालकाः अध्ययनाय पाठालयं गच्छन्ति। बालिकाः पुष्पाय उद्यानं व्रजन्ति। वयं जलाय नदीं गच्छामः। यूयम् अश्वेभ्यः तृणं यच्छथ। वयं ज्ञानाय पठामः। जनाः धनाय देशान्तरं गच्छन्ति। बालाः विद्यायै धनं यच्छन्ति।

प्रश्नाः -

१. धेनवः केभ्यः क्षीरं वितरन्ति?

२. व्याघ्रः किमर्थं परिभ्रमति ?

३. बालकाः किमर्थं पाठालयं गच्छन्ति

४. बालिकाः किमर्थम् उद्यानं व्रजन्ति ?

५. यूयं किमर्थं नदीं गच्छथर

R. Varalakshmi



Professor
Department of Sanskrit Studies

## अष्टमः पाठः । - 8th Lesson

शाखायाः पर्णानि पतन्ति। मक्षिकाः पुष्पेभ्यः मधु पिबन्ति। बीजात् अङ्कुरः प्ररोहति । पात्रात् जलं स्रवति । धेनुः व्याघ्रात् त्रस्यति । अहं पीठात् उत्तिष्ठामि । त्वं तरोः अवरोहसि। पर्वतात् नदी प्रवहति । धनिकाः ग्रामात् नगरं गच्छन्ति । समुद्रात् जनाः रत्नानि आनयन्ति।

प्रश्नाः

१. कस्याः पर्णानि पतन्ति ?

२. मक्षिकाः केभ्यः मधु पिबन्ति ?

३. कस्मात् अङ्कुरः प्ररोहति ?

४. कस्मात् जलं स्रवति

५. धेनुः कस्मात् त्रस्यति ?

**नवमः पाठः। 9th Lesson**

दुहिता भर्तुः गृहं गच्छति। माता दुहितुः शिशुं लालयति। शिशवः मातॄणां गानेन तुष्यन्ति। पत्नी पत्युः आज्ञाम् अनुसरति । पुत्रः पितुः आज्ञया जामातुः गृहात् स्वसारम् आनयति। वयं शकटस्य शब्दम् आकर्णयामः । यूयं धेनोः क्षीरं पिबथ।

प्रश्नाः -

१. दुहिता कस्य गृहं गच्छति?

२. माता कस्याः शिशुं लालयति?

३. शिशवः कासां गानेन तुष्यन्ति ?

४. पत्नी कस्य आज्ञां अनुसरति ?

५. पुत्रः कस्य गृहात् काम् आनयति ?

R. Varalakshmi



Professor
Department of Sanskrit Studies
University of Hyderabad
P.O. Central University
Hyderabad-500 046,TS

SL-SANSKRIT

II PAPER

II SEMESTER

MODULE

**UNIT-1**

1. बुद्धस्य वैराग्योदयः - बुद्धचरितम् - अश्वघोषः

Word to word meaning and translation verses 1 to 10 & Essay

2. सक्तुप्रस्थस्य महत्त्वम् - महाभारतम् - वेदव्यासः

Annotations &Essay

**UNIT-II**

3. वैज्ञानिकसंहिता- वैज्ञानिकषाण्मुखम् - आचार्य पुल्लेल श्रीरामचन्द्रुडु

Essay

4.न गङ्गदत्तःपुनरेति कूपम् - पञ्चतन्त्रम् -विष्णु शर्मा

Essay & Annotations

**UNIT-III**

5. समासाः-अव्ययीभावः, तत्पुरुषः,कर्मधारयः,द्वन्द्वः,द्विगुः,बहुव्रीहिः

6. धातुरूपाणि-परस्मैपदि धातवः,

**UNIT-IV**

दैवासुरसम्पद्विभागयोगः- भगवद्गीता **(for seminar)**

बालादर्शः10th to 13th lesson

R. Varalakshmi

Professor
Department of Sanskrit Studies
University of Hyderabad
P.O. Central University
Hyderabad-500 046, TS

## दशमः पाठः ।

काकः शाखायाम् उपविशति । स दिवा आकाशे डयते, नक्तं नीडे वसति । भेकाः वापीषु वसन्ति। ते वर्षासु रटन्ति। अयं भेकः भूमौ प्लवते। लतासु कुसुमानि विकसन्ति। वयं तरुषु फलानि पश्यामः । समुद्रे रत्नानि जायन्ते। नराः भूमौ वसन्ति। देवाः स्वर्गे तिष्ठन्ति।

प्रश्नाः

१. काकः कस्याम् उपविशति ?

२.स दिवा कुत्र डयते?

३. स नक्तं कुत्र वसति?

४. भेकाः कुत्र वसन्ति ?

५. ते कदा रटन्ति?

## एकादशः पाठः। 11th lesson

अत्र एका वीणा अस्ति। गायकः वीणां वादयति । घण्टा तत्र वर्तते । रामः घण्टां वादयति। घण्टायाः स्वरः परुषः। वीणायाः स्वरः मधुरः। मालती सम्यक् वीणां वादयति। मालविका मधुरं गायति । कोकिला वसन्ते मधुरं कूजति । गानेन सर्वे जनाः तुष्यन्ति।

प्रश्नाः -

१. कुत्र एका वीणा अस्ति?

२. कः वीणां वादयति?

३. कः घण्टां वादयति?

४. कस्याः स्वरः मधुरः ?

५. कस्याः स्वरः परुषः?

Professor
Department of Sanskrit Studies
University of Hyderabad
P.O. Central University
Hyderabad-500 046, TS

K. Varalakshmi

## द्वादशः पाठः- 12th lesson

इह एकं पुस्तकम् एका पेटिका च स्तः। तत् कृष्णस्य शब्दमञ्जरी पुस्तकम् । तस्य पुस्तकस्य मूल्यं एको रूप्यकः । तस्मिन् पुस्तके द्विशतं पुटानि सन्ति । मम श्रीरामोदन्तपुस्तके षष्टिः पुटानि सन्ति। अस्यां पेटिकायां वस्त्राणि भूषणानि धनानि च विद्यन्ते। इयं हरेः पेटिका। स इमां कुञ्चिकया उद्घाटयति। कुञ्चिका हरेः गोपालस्य वा करे वर्तते ।

प्रश्नाः -

१. इह के स्तः ?

२. इदं कस्य पुस्तकम् ?

३.कृष्णस्य पुस्तकस्य मूल्यम् किम् ?

४. कस्मिन् द्विशतं पुटानि सन्ति?

५. तव पुस्तके कति पुटानि सन्ति ?

## त्रयोदशः पाठः। 13th Lesson

नक्षत्राणि कदा प्रकाशन्ते? नक्षत्राणि रात्रौ प्रकाशन्ते। तानि दिवा न प्रकाशन्ते । मेघैः आवृते नभसि रात्रौ च न प्रकाशन्ते। यदा सूर्यः अस्तम् अयते तदा ताराणि प्रकाशन्ते । तानि व्योम्नि हीरवत् द्योतन्ते नक्षत्राणां राजा चन्द्रः चन्द्रस्य प्रकाशः चन्द्रिका । अहं नक्षत्राणि गणयामि।किन्तु तानि गणयितुं न पारयामि। तानि असङ्ख्यानि वर्तन्ते । तत्र अश्विन्यादीनिसप्तविंशतिः नक्षत्राणि प्रधानानि ।

प्रश्नाः -

१. नक्षत्राणि कुत्र प्रकाशन्ते?

२. तानि कदा न प्रकाशन्ते?

३. तानि कुत्र हीरवत् द्योतन्ते?

४. केषां राजा चन्द्रः ?

५. तस्य प्रकाशस्य नाम किम्?

Depa... University of Hyder... P.O. Central University Hyderabad-500 046, TS

K. Varalakshmi

III SEMESTER III PAPER MODULE

UNIT-1

1. **"प्रवर्ततां प्रकृतिहिताय पार्थिवः"** अभिज्ञानशाकुन्तले सप्तमाङ्कः - महाकविः कालिदासः

a) निर्दिष्टश्लोकानां प्रतिपदार्थतात्पर्यम् (२. त्रिस्रोतसं...,३. शैलानाम.., ४. स्वायम्भुवान्...

५. मनोरथाय.... ६. अर्धपीतपयो..... ११.सुतनु.., १२ पुत्रस्य..., १३. आखण्डलसमो..,

१७.रथेनानुद्रत... १८. तव भवतु बिडौजाः.........)

a) व्यासरूपप्रश्नाः

2. **नवरत्नानि** - आचार्यरामुलु

b) व्यासरूपप्रश्नाः

UNIT-II

3. **शूद्रकवैशम्पायनयोः सम्भाषणम् -**

कादम्बरीतः - बाणमहाकविः

a) सन्दर्भव्याख्या b) व्यासरूपप्रश्नाः

4. **रामदासः -**

आन्ध्रकाव्यकथाः - सन्निधानं सूर्यनारायणशास्त्री

a) सन्दर्भव्याख्या b) व्यासरूपप्रश्नाः

UNIT-III

5. **शास्त्रकाराः**:- पाणिनिः कौटिल्यः भरतमुनिः आर्यभटः भास्कराचार्यः कणादः

6. **बालादर्शः** - एकादशपाठतः चतुर्दशपाठपर्यन्तम् (14th lesson to 17th lesson)

R. Varalakshmi

Professor
Department of Sanskrit Studies
University of Hyderabad
P.O. Central University
Hyderabad-500 046,TS

बालादर्शः III SEMESTER

चतुर्दशः पाठः। 14th Lesson

अत्र एकः बालकः एका बालिका च तिष्ठतः। तौ पाठालयात् आगच्छताम्। सा बलिका तस्य बालकस्य स्वसा तौ किं कुरुतः ? तौ सल्लपतः। स बालकः ह्यः पाठं न अपठत् । उपाध्यायः तम् अताडयत्। तां वार्ता तस्य स्वसा पित्रे अकथयत्। पिता पुत्रम् अभर्त्सयत । तेन कुपितः स बालकः स्वसारम् अनिन्दत् सा भ्रातरं तर्जन्या तर्जयते ।

प्रश्नाः -

१. अत्र को तिष्ठतः ?

२. तौ कुतः आगच्छताम्

३. सा बालिका का?

४. कः ह्यः पाठं न अपठत?

५. कः तम् अताडयत?

**पञ्चदशः पाठः। 15th Lesson**

रामा उत्तिष्ठ तव हस्तौ दर्शय त्वं केन हस्तेन लिखसि? आर्य अहं अनेन हस्तेन लिखामि। स दक्षिणहस्तः । अन्यः वामहस्तः। एकस्मिन् हस्ते पञ्च अगुल्यः सन्ति । द्वयोः हस्तयोः दश अङ्गुल्यः सन्ति । पाणौ विविधाः रेखाः विद्यन्ते । रामः उपविशतु कृष्णः उत्तिष्ठतु । कृष्ण। त्वं हस्ताभ्यां नेत्रे स्पृश। वयं नेत्राभ्यां पश्यामः । हस्ताभ्यां कर्माणि कुर्मः। अन्येषां प्राणिनां द्वे नेत्रे विद्येते; हस्तौ न स्तः ।

प्रश्नाः –

१. एकस्मिन् हस्ते कति अङ्गुल्यः सन्ति ?

२. द्वयोः हस्तयोः कति अङ्गुल्यः सन्ति?

३. कुत्र विविधाः रेखाः विद्यन्ते ?

४. हस्ताभ्यां किं कुर्मः ?

५. द्वे नेत्रे विद्येते, हस्तौ न स्तः, केषाम् ?

Professor
Department of Sanskrit Studies
University of Hyderabad
P.O. Central University
Hyderabad-500 046, TS



R. Varalakshmi

## षोडशः पाठः । 16th Lesson

अयं कः? सः बालकः । अस्य नाम किम्? तस्य नाम कृष्णः इति । स किं करोति? स लिखति। स भ्रात्रे पत्रिकां लिखति। त्वं किं लिखसि ? अहं लेखावलिपुस्तके संस्कृतप्रतिलेखनं लिखामि। प्रतिलेखनेन अक्षराणि सुन्दराणि भवन्ति । तव नाम किम् ? मम नाम राघवः इति । राघव त्वं कस्मात् न लिखसि ? आर्य मम लेखनी नास्ति । लेखन्या विना कथं लिखामि? भद्र। त्वं प्रतिदिनं लेखन्या पुस्तकेन च विना पाठालयम् आगच्छसि। एवं मा कुरु। आर्य अहं कृष्णेन सह गृहं गत्वा लेखनीम् आनयामि।

प्रश्नाः

१. अयं बालकः किं लिखति?
२. केन अक्षराणि सुन्दराणि भवन्ति ?
३. राघवः कुतः न लिखति
४. सः प्रतिदिनं पाठालयं कथम् आगच्छति?
५. त्वं केन सह कुत्र गत्वा लेखनीमानयसि ?

## सप्तदशः पाठः। 17th Lesson

अस्मिन् विद्यालये चतस्रः कक्ष्याः सन्ति । एते सप्त छात्राः चतुर्थकक्ष्यायां पठन्ति। चित्रं पश्य। एको बालकः तिष्ठति। अन्ये उपविष्टाः। तिष्ठन् बलकः उपाध्यायस्य प्रश्नानाम् उत्तराणि कथयति। त्वं कस्यां कक्ष्यायां पठसि ? अहं तृतीयकक्ष्यायां पठामि कति छात्राः त्वया सह पठन्ति। मया सह चत्वारो बालकाः तिस्रो बालिकाश्च पठन्ति । आहत्य वयम् अष्टौ सहपाठिनः स्मः। द्वितीयकक्ष्यायां द्वे बालिके त्रयो बालकाश्च पठन्ति। प्रथमकक्ष्यायां पञ्च बालकाः पञ्च बालिकाश्च सन्ति।

प्रश्नाः -

१. अस्मिन् विद्यालये कति कक्ष्याः सन्ति?

२. एते सप्त छात्राः कस्यां कक्ष्यायां पठन्ति?

३. तिष्ठन् बालकः किं करोति?

४. तृतीयकक्ष्यायां के के पठन्ति?

५. आहत्य यूयं कति सहपाठिनः स्थ?

Department ... University ... P.O. Central University Hyderabad-500 046,TS

K. Varalakshmi

IV SEMESTER IV PAPER MODULE SL-SANSKRIT

**UNIT-1**

1. **चित्रपटदर्शनम्** -उत्तररामचरितम् - भवभूतिः

a) निर्दिष्टश्लोकानां प्रतिपदार्थतात्पर्यम् (२.विश्वम्भरा. ३. लौकिकानां... ५. स्नेह दयां.... ६. उत्पत्तिपरिपूतायाः. १० जीवत्सु तात... १३. स्मरसि सुतनु.... १४. अथेदं रक्षोभिः... १६.आ विवाहसमयाद्. १७. इयं गेहे लक्ष्मी... १८. अद्वैतं सुखदुःखयोः)

b) सन्दर्भव्याख्या c) **व्यासरूपप्रश्नाः**

2. **विवेकानन्दम्** -श्रीधरभास्करवर्णेकरः

b) सन्दर्भव्याख्या c) **व्यासरूपप्रश्नाः**

**UNIT-II**

3. **विश्रुतचरितम्** -दशकुमारचरितम्- दण्डिमहाकविः

a) व्यासरूपप्रश्नाः

4. **ध्रुवोपाख्यानम्** -पि.वि. काणे

b) सन्दर्भव्याख्या c) **व्यासरूपप्रश्नाः**

5. **कवयः**भासः, शङ्कराचार्यः, हर्षवर्धनः,भारविः,श्रीहर्षः,माघः.

**UNIT-III**

6. **कृदन्तरूपाणि**

7. **बालादर्शः** - पञ्चदशपाठः तः अष्टादशपाठपर्यन्तम् (18th lesson to 21st lesson)

## बालादर्शः IV SEMESTER

### अष्टादशः पाठः।- 18th Lesson

इदानीं सायाह्नः । पश्य। अस्मिन् क्रीडाङ्गणे षट् बालकाः कन्दुकेन क्रीडन्ति । कन्दुकः चर्मणा निर्मितः वातेन पूरितश्च । अतः स ताड्यमानः उत्पतति । ते बालकाः इतस्ततो धावन्तः हस्तेन पादेन च कन्दुकं ताडयन्ति। एको बालकः भूमौ उपविशति । स चिरं क्रीडनेन श्रान्तोऽभवत्। तस्य गात्रं स्विद्यति । स मुहूर्तं विश्रम्य भूयोऽपि क्रीडिष्यति । यदा सूर्यः अस्तं गमिष्यति तदा प्रकाशः न वर्तिष्यते। तदानीम् एते गृहं व्रजिष्यन्ति।

प्रश्नाः

१. इदानीम् कः समयः ?

२. बालकाः कुत्र केन क्रीडन्ति?

३. कन्दुकः केन निर्मितः केन पूरितश्च?

४. स ताड्यमानः किं करोति?

५. ते बालकाः किं कुर्वन्तः कन्दुकं ताडयन्ति?

### एकोनविंशः पाठः।- 19th Lesson

अत्र एकः पुष्पगुच्छो वर्तते। अयं रमणीयः पुष्पगुच्छः । अयं रूपेण नेत्रं गन्धेन घ्राणं च आनन्दयति। पश्य! तस्मिन एको भृङ्गः तिष्ठति स पुष्पेभ्यः मकरन्दं पिबति । तस्मात् भृङ्गस्य मधुपः इत्यपि नाम। भृङ्गाः मकरन्दं पिबन्तः मधुरं गुञ्जन्ति । पुष्पात् पुष्पं चलन्तः विहरन्ति । भृङ्गानां वर्णः नीलः ।

प्रश्नाः -

१. अयं कीदृशः पुष्पगुच्छः?

२. भृङ्गः किं करोति?

३. के किं कुर्वन्तः मधुरं गुञ्जन्ति

४. ते कथं विहरन्ति ?

५. भृङ्गानां वर्णः कीदृशः ?

Professor
Department of Sanskrit Studies
University of Hyderabad
P.O. Central University
Hyderabad-500 046, TS

R. Varalakshmi

## विंशः पाठः ।- 20th Lesson

इदानीं वर्षाकालः । पश्य आकाशं मेघैः सञ्छन्नम्। सर्वत्र वृष्टेः धाराः पतन्ति । जनः स्वीयानि कर्माणि त्यक्त्वा गृहं गताः। पक्षिणः शैत्येन पीडिताः वृक्षाणां शाखासु तिष्ठन्ति । कृषीवलाः परं क्षेत्राणि कर्षन्ति । ते कृष्टेषु क्षेत्रेषु धान्यानि वपन्ति । वर्षाकाले कूपाः सरांसि च जलेन पूर्णानि भवन्ति । नद्योऽपि कूलानि भञ्जयन्त्यः प्रवहन्ति । भूमौ सर्वत्र तृणानि उत्पद्यन्ते वृक्षा लताश्च पल्लविताः भवन्ति ।

प्रश्नाः

१. जनाः किं कृत्वा कुत्र गच्छन्ति ?

२. पक्षिणः शैत्येन पीडीताः कुत्र तिष्ठन्ति ?

३. के क्षेत्राणि कर्षन्ति ?

४. कुत्र धान्यानि वपन्ति ?

५. कस्मिन् काले कानि जलेन पूर्णानि भवन्ति?

## एकविंशः पाठः।- 21st Lesson

पूर्वं चोलदेशे द्वौ सखायावास्ताम्। तयोरेक विद्याप्रियः, अन्ये धनप्रियः। तयोः पितरौ अतीव दरिद्रौ । अतस्तौ पित्रोराज्ञया विदेशं गतौ । विद्याप्रियस्तत्र विद्यालयं प्रविश्य विद्यामधीतवान्। अन्यः कस्यापि श्रेष्ठिनः आपणे व्यापृतः प्रभूतं वित्तमार्जयति स्म। दशभ्यो वर्षेभ्यः परं तौ स्वदेशं प्रति प्रस्थितौ । वनमार्गेण गच्छतोस्तयोः धनप्रियस्य धनभाण्डं चोराः अपाहरन् । तेन स निर्धनो जातः । यदा तो स्वदेशमागतौ तदा विद्याप्रियं कृतविद्यं वीक्ष्य तद्देशीयो राजा तं मन्त्रिपदे न्ययोजयत्। धनप्रियस्तु जीविकार्थं गत्यन्तरम् अपश्यन् तस्यैव मन्त्रिणः सेवकोऽभवत्।

प्रश्नाः

१. कदा कुत्र द्वौ सखायावास्ताम्?

२. तौ कीदृशौ ?

३. कुतः तौ विदेशं गतौ ?

४. विद्यप्रियस्तत्र किं कृतवान् ?

५. अन्यः किमकरोत

Professor
Department of Sanskrit Studies
University of Hyderabad
P.O. Central University
Hyderabad-500 046,TS

K. Varalakshmi

**V SEMESTER** **V PAPER** **SL-SANSKRIT**

**MODULE**

**UNIT-1**

**LESSON-1** दशरूपकम् - धनुञ्जयः (Topics prescribed from dasarupakam text are given below)

1 दशरूपकाणि - दशरूपकाणाम् परिचयं कुरुत ?

2 रूपकलक्षणानि -दशरूपोकक्तदिशा रूपकलक्षणानि विशदयत?

3 नायकलक्षणानि - दशरूपोकक्तदिशा नायक लक्षणानि विशदयत?

4 नायिकालक्षणानि -दशरूपोकक्तदिशानायिकालक्षणानि विशदयत?

5नाटिका लक्षणानि -दशरूपोकक्तदिशानाटिकालक्षणानि विशदयत?

LESSON-2 अवन्तु भारतप्रजाः स्वतन्त्रभारतप्रभाम् -श्रीभाष्यम् विजय सारथिः

**UNIT-II**

**LESSON-1** ब्रह्मशक्तिर्गरीयसी

LESSON-II शिष्यानुशासनम्

**UNIT-III**

LESSON-1 अलङ्काराः (१.उपमा २. अनन्वयः३.प्रतिवस्तूपमा

४ दीपकम् ५ अप्रस्तुतप्रशंसा ६ दृष्टान्तः )

LESSON-II पत्रलेखनम् (Sanskrit letters Prescribed form KOVIDA text are given below)

1 पितरम् प्रति पुत्रस्य पत्रम्

2 विरामार्थं आवेदनपत्रम्

3 पुस्तकप्रेषणाय आवेदनपत्रम्

4 नगरपालिकां प्रति आ

Professor
Department of Sanskrit Studies
University of Hyderabad
P.O. Central University
Hyderabad-500 046,TS

K. Varalakshmi

SL-SANSKRIT

VI SEMESTER

VI PAPER

MODULE

**UNIT-1**

LESSON-1 मधुरोपदेशः

LESSON-II वृत्तरत्नाकरः :( Sanskrit meters prescribed from vrittaratnakaram text are given below)

1 अनुष्टुप् 2.उपजाति 3.वसन्ततिलका 4.इन्द्रवज्रा 5.उपेन्द्रवज्रा

**UNIT-II**

**LESSON-1** नचिकेतोपाख्यानम्

LESSON-II दकरकथा

**UNIT-III**

LESSON-1 अलङ्काराः

१. उपमेयोपमा २.अर्थान्तरन्यासः ३ काव्यलिङ्गम् ४ विनोक्तिः ५निदर्शना ६विशेषोक्तिः

LESSON-II संस्कृतसाहित्यपरिचयः( Topics prescribed from KOVIDA text are given below)

१.भारतीय दर्शनानि -भारतीयदर्शनानि उद्दिश्य निबन्धं लिखत?

२.गद्यकाव्यम् -संस्कृतगद्यकाव्यमुद्दिश्य निबन्धं लिखत?

३.चम्पूकाव्यम्- काव्येषु चम्पूकाव्यानां वैशिष्ट्यं निरूपयत?

४. खण्डकाव्यानि - खण्डकाव्यानां महत्त्वं विशदयत?

५. नीतिकाव्यनि -संस्कृतसाहित्ये नीतिकाव्यानां वैशिष्ट्यं विशदयत?

६. आधुनिकसंस्कृतसाहित्यम्-आधुनिकसंस्कृतसाहित्यस्य परिचयं कुरुत?

K. Varalakshmi